नं० ५६६५-घ

त्रिपुरसुन्दर्याः सौभाग्यकवचम् ([illegible])

पत्राणि ६ (षट्) (सम्पूर्णम्)

नं० १२०५ ग
त्रिपुरसुन्दर्याः सौभाग्यकवचम्
६ पं० ... तन्त्र



नं० ५६६५-घ

। त्रिपुरसुंदर्याः सौभाग्यकवचम् । ६६२ (तन्त्रम्)

पत्राणि ६ (षट्) सम्पूर्णम्

१५८

ॐश्रीगुरवेशिवायोंनमः कैलासशिखरेरम्येसुखासीनंम
हेश्वरं गिरीशंगिरिजानत्वापर्यपृच्छत्कृतांजलिः रहस्यंरक्षण
करंसर्वसंपत्समृद्धिदं सर्वसौभाग्यदंनित्यंकिंवालोकेमहे-
श्वर श्रीईश्वरउवाच एतत्सौभाग्यकवचंरहस्यमतिदुर्लभं
सर्वसिद्धिप्रदंदेविश्रृणुसौभाग्यदंपरं शिवायांसततंपातुमहा
त्रिपुरसुंदरी शिरःकामेश्वरीपातुतत्पूर्वंभगमालिनी नित्याक्लि
न्नापातुदक्षंभीरुंडापश्चिमंशिरः वह्निवासीचतद्वामंविद्येश्वर्यै-
कांस्तथा शिवादूतीललाटंचत्वरितातस्यदक्षिणं तद्वामपार्श्व
मवतुतथैवकुलसुंदरी नित्यापातुभ्रुवोमध्यंभ्रुवौनीलप
ताकिनी वामभ्रुवंचविजयानयनंसर्वमंगला ज्वालामाला-

क्षि वामं च चित्रा रक्षतु नासिकां दक्षश्रोत्रं च गणपः सव्यं पातु
महोद्यमः दक्षनासापुटं दुर्गा तदन्यं पातु भारती अणिमा द
क्षिणपुटं महिमा च तदन्यतः ईशिता मूर्ध्नि दंतांश्च वशिता चेत
रांस्तथा ऊर्ध्वोष्ठं प्राप्तिसिद्धिश्च प्राकाम्या चाधरोष्ठकं रसासि
द्धिस्तु रसनां मोक्षासिद्धिस्तु तालुकं तालुमूलद्वयं ब्राह्मी माहे
श्वरी च रक्षतां कौमारी चिबुकं पातु तदधः पातु वैष्णवी कंठं
रक्षतु वाराही चैंद्राणी रक्षतादधः घंटिकां पातु चामुंडा महाल
क्ष्मीस्तु सर्वदा सर्वसंक्षोभिणी मुद्रा चोन्मादिस्कंधं रक्षतु दक्षि
णं तदन्यं द्राविणी मुद्रा पायादंसद्वयं क्रमात् आकर्षिणी वशिनी
च मुद्रा चोन्मादिन्यप्यथ भुजं महांकुशा वामं खेचरी दक्षकुक्षि

कं वामकुक्षिंबीजमुद्रायोनिर्दक्षिणबाहुकं ममत्रिखंडिनी
मुद्रावामबाहुंप्रपालयेत् कामाकर्षिणिकामुद्रारक्षतांदक्ष
कुर्परं कुर्परंवाममवतुबुद्ध्याकर्षिणिकातथा अहंकाराक
र्षिणीतुप्रकांडंपातुदक्षिणं शब्दाकर्षिणिवामंतुस्पर्शाक
र्षिणिकावतु प्रकोष्टंदक्षिणेपातुरूपाकर्षिणिकेतरं रसा
कर्षिणिकापातुमणिबंधंचदक्षिणं गंधाकर्षिणिकावामं
चित्ताकर्षिणिकावतु स्मृत्याकर्षिण्यसौपाणिंनामाकर्षिणिद
क्षिणं बीजाकर्षिण्यमूःपायात्सततंदक्षिणांगुलीः आत्माक
र्षिणिकामावाअमृताकर्षिणीनखान् शरीराकर्षिणीवामन
खान्रक्षतुसर्वदा अनंगकुसुमाशक्तिःपातुदक्षस्तनोपरि।

अनंगमेखला चान्यः स्तनोर्ध्वं पातु सर्वदा अनंगमदना रक्षेत्तस्त
नांतं चूचुकं तथा रक्षतादनिशं देवी ह्यनंगमदनातुरा अनंगवे
गिनी क्रोडमनंगासांकुशावतु अनंगरेखा वामं तु रक्षोजं तस्य चूचु
कं अनंगमालिनी पायाद्धृदः स्थलमहर्निशं सर्वसंक्षोभिणी शक्ति
हृत्सर्वद्राविणी परा कुक्षिं सर्वाकर्षिणी तु पातु पार्श्वं च दक्षिणं आ
ह्लादिनी वामपार्श्वं मध्यं संमोहिनी चिरं सर्वदा स्तंभिनी पृष्ठं नाभिं
वै सर्वजृंभिनी वशंकरी वस्तिदेशे जृंभिणी सर्वदा कटिं उन्मादि
नी विशेषेण पायाज्जघनमंडलं सर्वार्थसाधिनी शक्तिर्नितंबं र
क्षतादियं दक्षस्फिजं सदा पातु सर्वसंपत्तिरूपिणी सर्वतंत्रमयी
शक्तिः पातु वामस्फिजं मम पायात्कुकात्स्थलद्वंद्वं सर्वद्वंद्वक्षयं

क्षरी सर्वसिद्धिप्रदादेवीपातुदक्षिणवक्षु (सर्वसंपत्प्रदादेवी
तदन्यं) सर्वकामप्रदादेवीपातुमुष्कंचदक्षिणं पायात्तदन्य
मवतुसर्वदुःखविमोचिनी सर्वमृत्युप्रशमनीदेवीपातुगुदंमम
पातुदेवींदेहमध्यंसर्वविघ्ननिवारिणी सर्वांगसुंदरीदेवीरक्ष-
तांदक्षसक्थिकां वामसक्थितलंपायात्सर्वसौभाग्यदायिनी ।
अष्ठीवंममसर्वज्ञादेवीरक्षतुसर्वदा अन्याष्ठीवंसर्वशक्तिर्देवी
पातुचिरंमम सर्वैश्वर्यप्रदादेवीरक्षजानुंसदावतु सर्वज्ञान
मयीदेवीतदन्यंजानुरक्षतु अव्यादियंरक्षजंघांसर्वव्याधि
विनाशिनी तदन्यंपातुमेदेवीसर्वाधारस्वरूपिणी सर्वपा
पहरादेवीगुल्फंरक्षतुदक्षिणं सर्वानंदमयीदेवीवाम

3

गुल्फंसदावतु पार्ष्णिंमेदक्षिणांपातुसर्वरक्षीस्वरूपिणी प्र
व्यात्सव्यंसदापार्ष्णिंसर्वेप्सितफलप्रदा दक्षांघ्रिंपातुवशिनीपू
र्वेवाग्देवताममम करोतुक्षेमिणीशान्तिस्त्रैलोक्याकर्षणंमम।
मोहिनीरक्षतादिक्षुकोदंडंमंगमौर्विकं तनोतुसततंपाशोव
शीकरणमुत्तमं दक्षपादतलंसर्वेश्वरीवाग्देवतावतु वाम
पादतलंपायात्कौलिनीदेवताममम निदघ्यादंकुशंनित्यंस्तंम
नंशत्रुसंकटे पीठंमेवतुकामाख्यापातुकामंसुधाममम सदा
पूर्णगिरिःपीठंपायादर्थंमहेंद्रकं जालन्धरस्यजालन्ध्रीपीठंरक्ष
तुमेसदा सायुज्यंतनुतांमह्यः श्रीपीठंश्रीकरंतथा कामेश्वरी
तुमेसदा विद्यातत्त्वंपातुशिवतत्त्वंश्रीम
चात्मतत्त्वंरक्षेद्वज्रेश्वरीतथा

4

गमालिनी कामंछिंद्यान्महाशत्रुममृतार्णवमासनं क्रोधं
बोधापहंहन्यादन्योत्पोतांबुजासनं लोभंदेव्यासनंभिंद्याद्दिव्या
त्मादिव्यरूपवान् मोहंसंहरतांचक्रंमदंमंत्रासनंमम मात्स
र्यंनाशयेन्नित्यंममसाध्यासनंजवात् आधारंत्रिपुरालक्ष्मी:
स्वाधिष्ठानंसुरेश्वरी मणिपूरंममध्येयंपायात्रिपुरसुंदरी इडांपु
राभगवतीपिंगलांपुरभैरवी इडांमेत्रिपुरासिद्धात्रिपुरांबाचपिं
गला सुषुम्णापातुमेनित्यंमहात्रिपुरसुंदरी सर्वसंक्षोभणं
चक्रंप्राणाद्यंवायुपंचकं सौभाग्यदायकंचक्रंनागाद्यनिल
पंचकं सर्वार्थसाधकंचांतःकरणानांचतुष्टयं सर्वरक्षाक
रंचक्रंरक्षतांमेगुणत्रयं सर्वरोगहरंचक्रंपायात्तुर्यष्टकंचमे

सर्वसिद्धिप्रदं चक्रं ममाव्यात् कोशपंचकं सर्वानंदमयं चक्रा-
मायुः कीर्तिं च रक्षतु सौंदर्यं मन्मथः पातु रतिश्चापि रतिं मम प्री
तिं मे पातु सा प्रीतिरुत्साहं च वसंतकः संकल्पं कल्पको द्यानं म
हालक्ष्मीर्ममाश्रियं कार्तिकपालिनी रक्षेत् मंदिरं मम मंडपं सुत्रा
ञ्शंखनिधिः पायाद्भार्यां पद्मनिधिस्तथा मार्गं मां भैरवी रक्षेत् मा
तंगी मुकुटं तथा अष्टदिक्षु महेंद्राद्याः सायुधाः पातु मां सदा पा
यादूर्ध्वदिशं ब्रह्मा विष्णुश्चक्रायुधोप्यधः अनावृत्तानि स्थानानि
कवचेन तु यानि च तानि रक्षंतु सततं शिवाद्या गुरवो मम इदं सौ
भाग्यकवचं स्वकोयश्च धारयेत् त्रिसंध्यं पठति प्रीत्या स्वगुरुयाद्भ
समाहितः तस्य शीघ्रेण सिद्ध्यंति सिद्धयस्त्वणिमादयः गुटिकापा

ड्डकाद्यष्टसिद्धयः संभवंतिच वश्यादीन्यष्टकर्माणि योगंसांष्टां
गमेवच ब्रह्मविष्णुगिरीशेंद्रकंदर्परविभिः समं विचरत्यखि
लांल्लोकान्सिद्धगंधर्वसेवितः तस्य स्मरणमात्रेण ग्रहभूतपिशा
चकाः कीटवत्प्रविलीयंते कूष्मांडाभैरवादयः तस्यांघ्रितोय
पतनात्प्रणश्यंति महारुजाः तत्पादकमलासक्तरजोलेशाभिम
र्षणात् वश्यंभवतिशीघ्रेण त्रैलोक्यंसचराचरं आबालमहिला
मूयः किमुपायाविमोहिताः वीणाधरयाविद्रुमशोणाधरयास्तुवि
स्मितांस्तुकया श्यामलयाकोमलया चेतसिलीनाशिवात्तयापाया
त् इतिश्रीमदुमामहेश्वरसंवादेश्रीमत्त्रिपुरसुंदर्याः सौभाग्यक
कचंसंपूर्णम् ॥ ॐशिवसदाशिवशंभुपद्मजविष्णुरुद्रसुरेश्वरे

र्महितपादसरोजकेसरधूलिरात्मविशुद्धये विदितविस्तृतवैभवाभवभावनीरधिपारदा भवतु निर्मलनिश्चलोदयसारदा मम शारदा श्रीमन्महामाहेश्वराचार्यवर्यश्रीसाहिबकौलपादानामियं कृतिः ॥ ७ ॥

6

नं० ५६६५-घ

(तन्त्रम्)

त्रिपुरसुंदर्याः सौभाग्यकवचम्

पत्राणि ६ (षट्) (संपूर्णम्)

नं० १२०५

5665

F - 6

complete